# षष्ठोऽध्यायः

- स्वामिनारायणभाष्यमाश्रित्य सर्वभूतरुतज्ञानयोः कारणविमर्शः।
- परचित्तज्ञानमन्तर्ध्यानविभूत्योः कारणविमर्शः।
- भुवनज्ञानविपरिकृष्टज्ञानयोः कारणसमीक्षणम्
- आवरणज्ञानस्वर्गलोकादीनां कारणसमीक्षणम्।

# षष्ठोऽध्यायः

**स्वामिनारायणभाष्यमाश्रित्य सर्वभूतरुतज्ञानयोः कारणविमर्शः -**

स्वामिनारायणभाष्ये शब्दः श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्त्यवच्छिन्नो गौरितिशब्दः, पदजन्यप्रतिपत्तिविषयः सास्नामत्त्वादिरूपो गौरित्यर्थः, विषयकाराः बुद्धिवृत्तिर्ज्ञानं गौरितिप्रत्ययः निंगद्यते एते वस्तुतो भिन्नाः, तत्र शब्दः-गुणपदार्थोवाचकः, अर्थः- द्रव्यपदार्थो वाच्यविषयविशेषः, प्रत्ययः-गुणपदार्थो विषयी, तेषां परस्परं तादात्म्याऽसम्भवेन भिन्नत्वम्, तेषां शब्दार्थज्ञानानां व्यवहारे त्वितरेतराध्यासात् परस्परसङ्कीर्णत्वं भवति, यथा केनचिद् गामानयेत्युक्ते सति श्रोता कश्चिद् गोलक्षणमर्थ गोत्वाच्छिन्नं सास्नादिमत्पिण्डं, शब्दं च तद्वाचकं, ज्ञानं च तद्ग्राहकं, अभेदेनैव विनिश्चिनोति, नतु गोशब्दो वाचकः, गोरूपोऽर्थो वाच्यः, तद्ग्राहकं च ज्ञानं विषयीति, भेदेनाऽध्यवस्सति, तेषामितरेतराऽध्यासप्रयुक्तपुरुषस्य भेदेन ग्रहाऽसंवादिति।। इतरेतराऽध्यासो यथा केनचित् कोऽयमर्थः, कोऽयं शब्दः, किमिदं ज्ञानम्? इतिपृष्ठः सर्वत्र सङ्कीर्णमेवोत्तरं ददाति गोरित्यर्थः, गोरितिशब्दः, गोरिति ज्ञानमिति। इतरेतराध्यासेन तद्भेदान्ज्ञातुमशत्तरुः पुरुषः सङ्कीर्णमेकरूपमेवोत्तरं प्रयच्छति, अतस्तत्र त्रयाणामेकतत्त्वं तयाऽध्यवसायः संकर इति। तेषां शब्दार्थप्रत्ययानां प्रतिभागो विधेयः इदं शब्दतत्त्वं यद्वाचकम्, इदमर्थतत्त्वं यद्वाच्यम्, इदं प्रत्ययतत्त्वं यद् ग्रहकमिति। तत्र प्रत्येकस्वरूपे

संयमकर्तुर्योगिनः सर्वभूतप्राणिमात्राणां यानि रुतानि वाणीविशेषाणि तज्ज्ञानं भवति अनेन प्राणिना एतदभिप्रायेणाऽयं शब्द उच्चारित इति, योगजधर्मस्याऽचिन्तशक्तिकत्वाद् धर्माणां स्वसदृशफलसम्पादकत्वस्य स्वाभाविकत्वाच्च वर्तते। अस्मादादिनां यद्यपि शब्दार्थप्रत्ययभेदसाक्षात्कारो भवति तथापि तस्य संयमाऽजन्यत्वान्न सर्वभूतरुतज्ञानं भवतीति प्रतिपादितमस्ति।[325]

सामान्यतः व्यवहारे एषां संकरो भवति अत एत एकाकारा इव प्रतीयन्ते। एतेषां भेदे संयमात् पशुपक्षीमृगादिसम्मत जीवैः उच्चार्यमाणानां शब्दार्थानाम् अर्थज्ञानं भवति। व्याकरणमहाभाष्ये "नित्येशब्दार्थसम्बन्धे" इति कृत्वा शब्दार्थसम्बन्धस्य नित्यता उद्घोषिता।

वाक्यपदीयेऽपि भर्तृहरिणा अस्य सिद्धान्तस्य पुष्टि कृता वर्तते।

**वाक् नित्याशब्दार्थ सम्बन्धाः समाम्नाता महर्षिभिः।**

**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभि।।**[326]

योगी संसारे भाषमाणानां समस्तमानवीयभाषाणां ज्ञाता भवति। योगिनो गुरवः स्वविभिन्नदेशीयान् शिष्यान् प्रति सूक्ष्मध्यानावस्थायां तेषां भाषायाः प्रयोगं कुर्वन्ति। बदरिकाऽऽश्रमस्य समीपे एकः तरीम नामकः साधुरस्ति सः शताधिकः भाषाणां प्रयोगं करोति इति श्रूयते। श्रुतिषु च अस्य योगसूत्रस्य पुष्टी कृता वर्तते।

---

325 योगदर्शनस्वामिनारायणभाष्यम् पृ. 273

326 व्याकरण महाभाष्यम्

## तत्तज्जन्तुध्वनौ चित्तसंयमात् सर्व जन्तुरूपज्ञानम्।[327]

इत्थं संस्कार साक्षात्कारेजाते सति योगी पूर्वजातिज्ञानं प्राप्नोति। अनेनैव प्रकारेण अन्येषां जीवानां संस्कारसंयमात् तेषां पूर्वजन्मनां ज्ञानं लभते। योगिनो गुरवः स्वशिष्यस्य पूर्वजन्मसंकारान् दृष्टवा तदनुसारं मन्त्रान् साधनान् च प्रददाति।

योगसूत्रस्य व्यासभाष्ये आख्यानमेकं प्राप्यते। अनेकाख्यानानुसारेण जैगीषव्य दशमहासर्गेषु जन्मपरिणामक्रमं स्मृतिहेतवे, अविद्याजन्याः संस्काराः पञ्चक्लेशानां हेतवः, शुभाऽशुभकर्मजन्या धर्माऽधर्मख्याः संस्कारा जात्यायुर्भोगहेतवः इति स्वीक्रियते, इदं भाष्यं वैशारदी-वार्तिकापेक्षयोः भिन्नं वर्तते। समाधिबलेन ज्ञातवान्। नारायणभाष्यानुसारं संस्कारत्रिविधाः - अनुभवजन्याः संस्काराः कोऽहमासम्। कीदृशश्वासमिति सर्व प्राग्भवीयं स्ववृत्तान्तं जानाति, एवं वर्तमानकालिकेषु स्वपरसंस्कारेषु संयमकरणाद् वर्तमानकालीनं स्वपरवृत्तान्तं जानाति, कोऽहमस्मि इति।

यमेषु अन्यतम अपरिग्रह इति नाम भेदः। तत्र अपरिग्रहे यदि योगिन अभ्यासपरिपाकवशात् प्रतिष्ठा जायते तेन योगी स्वकीयपूर्वजन्मविषयकं सर्व जानाति। स पूर्वजन्मनि क आसीत् केन प्रकारेण जीवनयापनं करोति स्म, कस्मिन् कुले कस्य जन्म अभवत्, इदानीं कीदृशः तथा आगामिनिकाले तस्य जन्म कुत्र कस्यां दिशि कस्य गुहे कस्मिन् कुले वा भविष्यति, कथं सः जीविष्यति इत्येतद् सर्व पूर्वकालीनम् अपरकालीनं जन्मादि विषये जानाति। यत अपरिग्रहस्थैर्ये कथं

---

[327] शण्डिल्योपनिषद् 1/52

जन्म भवतीति महत: रहस्यस्य साक्षात्कारं करोति। तदा इदमपि स जानाति यत् इदं शरीरं भूतानां समूहमात्रम् आहोस्विद् तेभ्यो भिन्नमिति स्वाक्रियते।

इदानीमपि पत्रपत्रिकासु पूर्वजन्मविषये प्रामाणिकघटनानां प्रकाशनं यदा कदा दृश्यत एव तत्रापि केचन स्वकीयस्य पूर्वजन्मन: स्मरणं कुर्वन्तो दृश्यन्ते। परं च तत् केवलं सामान्ये पूर्वं जन्मस्मृते: संस्कारवशात् भवति। एतादृशी स्मृति: किञ्चिद् कालानन्तरं लुप्यत एव।

परन्तु अपरिग्रह प्रतिष्ठाभ्यासात् यत् जन्ममृत्युरहस्यस्य साक्षात्कार: जायते तेन योगी स्वमोक्षाय अत्यधिक श्रदापूर्वक प्रवर्तते। श्रुतो च पूर्वजातिज्ञानस्य निरूपणं प्राप्यते।

### संचितकर्मणि चित्तसंयमात् पूर्वजातिज्ञानम्[328]

तत्र संचितकर्मणि चित्तसंयमात् ज्ञानमिदं संभवति।

---

[328] शांडिल्योपनिषद्- 7/52

**परचित्तज्ञानमन्तर्ध्यानविभूत्योः कारणविमर्शः -**

परचित्तज्ञानमन्तर्ध्यानविभूत्योः कारणविमर्शः अपरेषां चित्तं संयमस्य लक्ष्ये निर्धारिते सति अन्यचित्तस्य ज्ञानं भवति।

**प्रत्ययस्य परचित्तज्ञानम्।**[329]

सूत्रे प्रयुक्तं ''प्रत्ययस्य'' इति शब्दं गृहीत्वा नारायणभाष्यानुसारेपि प्रत्ययस्य - परचित्तस्य अर्थोगृहीतः। परचित्तसंयमेन योगी विविधविषयकं परचित्तं जानातीति, परमनोरथान् विजानात्यतो योगी अन्तर्यामीति आख्यायते।[330]

वाचस्पतिमिश्रः तथा भोजराजमते ''प्रत्ययस्य'' इत्ययस्य शब्दस्य परचित्तमेव अर्थो ग्राह्यः। विज्ञानभिक्षुमतानुसारेण प्रत्ययस्य रागादिमत्याः स्वकीय चित्तवृत्तेः संयमेन इत्यर्थ गृहीतः। अत्र वाचस्पति भोजराजयोः मतं भाष्यानुसामरि प्रतीयते। अतः ''प्रत्ययस्य'' इत्यनेन परचित्तस्येव ग्रहणं कर्त्तव्यम्। ऋषयो मुनयः योगिनश्च अन्यस्य मनसो भावं जानन्ति इति अयं विश्वासो भारतीय जनसाधारणेषु प्रसिद्धः।

परचित्तस्य विशेषतां अग्रे कथयति श्रीकृष्णवल्लभाचार्यः यस्य परस्य यच्चितं स्वकीयेनाऽऽलम्बनेन सहितं न शक्यते योगिना ज्ञातुम्, परचित्तऽऽलम्बनस्य योगिचित्ताऽविषयीभूतत्वाद् योगिचित्तेन परचित्तालम्बनस्याऽग्रहीतत्वात्, योगिचित्तेन तु परस्य चित्तमात्रमवगम्यते न तु नीलविषयस्य चित्तं पीतविषयस्य चित्तमिति वा, यच्च

---

[329] योगसूत्रम् 3/19

[330] योगदर्शनस्वामिनारायणभाष्यम् पृ. 275

न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वान्न भवति परचित्तस्य यो विषयस्तत्र ज्ञानम्, तस्मात्परस्य चित्तं निरालम्बनमेव गृह्यते योगिचित्तेन, किन्तु किमनेनाऽऽलम्बितमिति प्रणिधानं करोति यदा तदा योगी परचित्तस्याऽऽलम्बनीभूते विषयेऽपि संयमं कृत्वा तज्ज्ञानं प्राप्नोति, न तु पृथक् संयमं विना इति, परचित्तधर्मास्तु परचित्तमात्रसंयमादेव ज्ञायन्ते। संस्कारसंयमस्तु सानुबन्धसंस्कारविषयः, अयन्तु परचित्तमात्रविषय इति न तद् दृष्टान्तं युक्तमिति।[331]

योगसिद्धान्तचन्द्रिकारः प्रतिपादितमस्ति तत् परचित्तज्ञानं नीलविषयं पीतविषयमिति सालम्बनं नियमेन न भवति। तस्य परचित्तालम्बनस्य संयमविषयेण स्वचित्तेनाविषयीकरणादित्यर्थः। किमनेनालम्बितमिति प्रणिधाने तु भवत्येव तस्यापि ज्ञानं प्रणिधानविशेषमाहात्म्यादिति।[332]

विशेषः -

अनुभवी योगिनामतानुसारेण परचित्तज्ञानस्य उपायद्वयमस्ति। तयोः प्रथमोपाये स्वमनः बुद्धिं च परेषां मनसि बुद्धौ च लयं करोति। येन अन्यस्य चित्तवृत्ति ज्ञानं भवति। द्वितीयोपाये परस्य सूक्ष्मशरीरमाकृष्य तस्य चित्तवृत्तिज्ञानं करोति।

महायोगी गोपालनन्द नामक एकोत्कृष्टः ध्यानयोगी बभूव। तत्रैव ऋषीकेशनगरे केशवानन्द अवधूत नामकः एकः प्रसिद्धयोगी बभूव। स गंगायां जले स्थिता सन्

---

331 योगदर्शनस्वामिनारायणभाष्यम् पृ. 275

332 योगसिद्धान्तचन्द्रिका पृ. 145

श्री कृष्णमन्त्रस्य जपं करोति स्म। गोपालानन्द: तं मन्त्रम् प्राप्तुकाम आसीत्। तेन अवधूत केशवानन्दस्य सूक्ष्मशरीरस्य आकर्षणमारब्धम् परं स सफलो नाभवत्। तदा तेन स्वं सूक्ष्मशरीरं तस्य शरीरे प्रवेष्टुम् यत्न: कृत:। परं पुनरपि स असफलोऽभवत्। यतोहि केशवानन्द: शक्तिसम्पन्नयोगी आसीत्। अवरकोटिक: योगी उत्कृष्टकोटिकयोगिन: परचित्तज्ञाने सक्षमा भवन्ति। योगिनां जीवनचरितावलोकनेन ज्ञायते यत् इयं सिद्धि: योगिषु प्राय: दृश्यते एव। चित्तशुद्धौ जातायां सत्याम् इयं क्षमता अनायासेनैव भवति योगिन:।

अनेन ज्ञायते यत् योगिन: परचित्तस्य ज्ञानं कर्तुं सक्षमा भवन्ति। परचित्तसंयमात् तस्य चित्तस्थे: ज्ञानं भवति न तु आलम्बनस्य। आलम्बनं लक्ष्यं कुर्यात् चेत् तर्हि तस्यापि ज्ञानं भवितुमर्हति। श्रुतिषु परचित्ते चित्तसंयमात् परचित्तज्ञानं भवतित्युक्तम्।

**परचित्ते चित्तसंयमात् परचित्तज्ञानम्।**[333]

परचित्तज्ञानं बौद्धा: चेत: पर्यायज्ञानम् इति कथयन्ति। अनेन सर्वेषां चित्तस्य सर्वास्था प्रत्यक्षेण ज्ञातुम् शक्यते।

**अन्तर्धानसिद्धिर्निरुपणम्** –

स्वामिनारायणभाष्यानुसारं शरीरं तच्च शब्दस्पर्शरूपरसगन्धात्मकम्, तच्च रूपवत्तया चक्षुरिन्द्रियजन्यप्रत्यक्षविषयं भवति, अतो रूपे काचिद् ग्राह्यशक्तिर्विद्यते, योगी यदा स्वकायस्य रूपे संयमं करोति तदा रूपनिष्ठा या ग्रह्यशक्ति: सा स्तम्भ्यते, तेन

333 शांडिल्योपनिषद् 7/52

योगिशरीरस्य रूपं तिरोभूतमिवाऽऽवृतं भवति, अत: परेषां चक्षुष्प्रकाशस्य नेत्रवृत्ते: योगो न भवति स्वशरीरे, स्वशरीररूपं परस्य चक्षुर्विषयं न भवति यावत्, तेन भवति योगी तिरोभूत:।[334]

महर्षिणा पतञ्जलिना योगसूत्रे व्यासमहोदयेन प्रतिपादितमस्ति यत् शरीररूपे संयमेन शरीररूपस्य नेत्रेन्द्रियेण द्रष्टुं शक्याया: या शक्तिरहिता योगी स्वेच्छाया अवरूणद्धि। अस्या: द्रष्टुं शक्या: शक्ते: अवरोधे सति नेत्रप्रकाशसंयोगेन योगी अन्तर्धानाख्या सिद्धि: साधयति।

**कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुष्प्रकाश संप्रयोगेऽन्तर्धानम्।**[335]

शरीरं शब्दस्पर्शरूपरसगन्धात्कम्, तच्च रूपवत्तया चक्षुरिन्द्रियजन्यप्रत्यक्षविषयं भवति, योगी यदा स्वकायस्य रूपे सयमं करोति तदा रूपनिष्ठा या ग्राह्यशक्ति: सा स्तम्भयते। तेन योगिशरीरस्य रूपं तिरोभूतभिवाऽऽवृत्तं भवति।

भोजवृत्तिकार: प्रतिपादितमस्ति यत् काय: शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणस्तस्मिन्नस्त्यस्मिन्काये रूपमिति संयमात्तस्य रूपस्य चक्षुग्राह्यत्वरूपा या शक्तिस्तस्या: स्तंभे भावनावशात्प्रतिबन्धे चक्षुष्प्रकाशासंयोगे चक्षुष: प्रकाश: सत्त्वधर्मस्तस्यासंयोगे तद्ग्रहणव्यापारभावे योगिनोऽन्तर्धानं भवति, न केनचिदसौ

---

334 योगदर्शनस्वामिनारायणभाष्यम् पृ. 275

335 योगसूत्रम् 3/21

दृश्यत एव। एतेनैव रूपाद्यन्तर्धानोपायप्रदर्शनेन शब्दानीनां श्रोत्रादिग्राह्याणामन्तर्धानमुक्तं वेदितव्यम्।[336]

व्यासभाष्ये कथितमस्ति सत् कायरूपे संयमाद् रूपस्य या ग्राह्याशक्तिः तां प्रतिबध्नाति ग्राह्यशक्ति स्तम्भे सति चक्षु प्रकाशासम्प्रयोगेऽन्तर्द्धानमुत्पद्यते योगिनः। एतेन शब्दान्तर्द्धामुक्तम्।[337]

योगी शरीरे उपस्थिते सत्यपि तद् द्रष्टुम् न शक्नोति। इदं रूपान्तर्धानामस्ति। अनेनैव प्रकारेण शब्दस्पर्शरसगन्धादि अन्य विषयेऽपि शक्तिस्तम्भनेन शब्दादीनाम् अव्यतादिकं भवितुमर्हति।

शब्दान्तर्धाने सति योगिन इच्छां विना योगिशब्दं न केनापि श्रोतुं शक्यते। एवमेव योगीच्छां विना न कश्चिद् योगिनः स्पर्शादिकं कर्तुं शक्नोति।

अस्माकं पुराणेषु अन्यशास्त्रेषु च ऋषीणां योगिनां च अन्तर्धानस्य वर्णनं विपुलरूपेण प्राप्यते।

महारासलीला समये यदा राधिकायाः मनसि अभिमानोत्पद्यते तदा भगवान् योगेश्वरः श्रीकृष्ण अन्तर्धानं अभवत्। सामान्यरूपेण एवमेव हिमालये स्थिताः योगिनः न द्रष्टुं शक्यते।

336 भोजवृत्तिः पृ. 111

337 व्यासभाष्यम् पृ. 239

**एवमुक्तः प्रियावह स्कन्ध आरूह्यतामिति।**

**ततश्चान्तर्दधे कृष्णः सा वधूरन्वतप्यत्।।**[338]

विशेष :-

दर्शनक्रियायां त्रीणि वस्तूनि आवश्यकानि सन्ति तद्यथा -

1. सगोलक चक्षुरिन्द्रियः 2. भौतिक प्रकाशः 3. दृश्यवस्तुरूपम्

एषु त्रिष्वपि एकस्यापि अभावे दर्शनं भवितुं न शक्यते। उपनिषदि कायरूपे चित्तसंयमाद् अन्यादृश्यरूपं भवतीति उक्तम् - अस्मिन् विषये एक जनप्रसिद्धिः साधकसमुदाये श्रूयते यत् काश्यां एकः कुशलः चित्तग्राहक आसीत्।

**कायरूपे चित्तसंयमादन्यादृश्यरूपम्।**[339]

स योगीनः श्यामाचरण लाहिडी महाशयस्य चित्र ग्रहणार्थं गतः। परं सः चित्रं ग्रहीतुं नाशकत्। यतः नाशक्नोत्। यतः यदा तं दृश्यं ग्राहकेः यन्त्रगतदर्पणे पश्यति, तदा तत्र दृश्यस्य प्रतिबिम्ब एव नागतः तेन चित्राकर्षक यन्त्रस्य सम्यङ् निरीक्षणं कृतं तत्र न कोऽपि दोषः दृष्टः। तथापि योगिनः श्यामाचरणमहाशयस्य तस्मिन् यन्त्रविशेषे प्रतिबिम्बः न प्रविशति स्मः। अतः प्रतिबिम्बसमर्पणभावे चित्रं ग्रहीतं शक्नोत्। एतच्च योगिन अन्तर्धान सिद्धेः चमत्कारः यत् योगिनः यन्त्रस्य प्रतिबिम्बग्रहणशक्ति स्तब्धः। तेन यन्त्रे योगिनः प्रतिबिम्बो न प्रविष्टः। एवमेव अन्य

---

338 श्रीमद्भागवत्पुराणम् दशमस्कन्धम् 31/39

339 शाण्डिल्योपनिषद् 7/52

दृष्टुः पुरुषस्य कायग्रह्य चक्षुः शक्तेः स्तम्भनात् द्रष्टु : पुरुषस्य चक्षुषा प्रकाश संयोगो न भवति। न कोऽपि कल्पषः योगिनं द्रष्टुं पारयति। योगी यं कमपि स्वशरीरं दृश्यतां वाञ्छति तं प्रत्येव दृश्यो भवति। यं न वांछति तं प्रति अदृश्य एव तिष्ठति। उपर्युक्त जनप्रसिद्धि अनेकेषां योगिनां विषये उपलभ्यते।

**भुवनज्ञानविपरिकृष्टज्ञानयोः कारणसमीक्षणम्** -

नारायणभाष्यानुसारेण - सूर्यदेव संयमेन यत्र यत्र सूर्यरश्मयः व्याप्नुवन्ति तत्तद्भुवनस्थानां यावतां पदार्थविशेषाणां ज्ञानं भवति, अत्र सप्तलोकान् ज्ञात्वा अधिपतिसहिताः वर्णिताः - प्रजापतिसंयमात् - महर्लोकज्ञानम्। जनतपः सत्यलोकज्ञानं ब्रह्मणि संयमात्। अतलसुतललोकज्ञानं बले संयमात्, वितललोकज्ञानं हरे संयमात्। तलातलज्ञानं मये संयमात्, महातलरसातलपातालज्ञानं शेषनागे संयमादितिबोध्यम् भवति।[340]

"भुवनज्ञानं सूर्ये संयमात्"[341] इत्यस्मिन्न सूत्रे संयमविषये व्याख्याकाराणां मतभेदः दृश्यते। कुत्र संयमं कुर्यादिति। केचित् टीकाकाराः 'सूर्य' इत्यस्य पदस्य सूर्यज्योतिः कुर्वन्ति। केचिच्च सूर्यलोके इति अर्थ कुर्वन्ति। सूर्यलोकाधिष्ठाता यः देवः तत्र संयमं इत्यर्थः कुर्वन्ति। केचिच्च वेदान्तादिशास्त्रपराः "सूर्य आत्मा जगतस्तस्थुषश्च" इति कृत्वा समष्टिब्रह्माण्डाधिष्ठात् भूतस्य परमात्मनः विषये संयमेन ब्रह्माण्डस्य ज्ञानं भवति इति तात्पर्य व्यञ्जयन्ति। यतोहि भुवनानामधिष्ठाता परब्रह्म एव। स समग्रस्य जगत आधारभूत आत्मा। इत्येवरूपेण आधिभौतिकादिदैविकाध्यात्मिक इति सिद्धान्तत्रयमनुसृत्य टीकाकाराणां मतभेदस्य समन्वयो समाधानं वा भवितुमर्हति। यतः केनचिदधिभूतरूपेण तात्पर्य ग्रहीतं

---

340 योगदर्शनस्वामिनारायणभाष्यम् पृ. 274

341 योगसूत्रम् 3/26

केनचिदाधिदेवरूपेण केनचिदध्यात्मरूपेण इति। यथा "यत् ब्रह्माण्डे तत्पिण्डे" इति सिद्धान्तानुसारेण यदि पिण्डसंवित् जायते तर्हि ब्रह्मण: संविदपि जायते। अत: पिण्डस्थाधिष्ठानभूतं केन्द्रस्थानं सुषुम्नाद्वारमेव। यत: तदध: नाभिमण्डलसूर्यस्थानं ज्योतिस्थानं वा इति योगशास्त्रे प्रसिद्धम्।

अन्यच्च "सुषुम्नान्तर्गतं" विश्वम् इति सिद्धान्तानुसारेण सूर्य: इतिपदस्य सुषुम्नाद्वारम् इति तात्पर्यम् अभिहितम्। यतोहि साधनापथे सुषुम्नाद्वारे संयम आवश्यक एव अत: तत्र संयमात्तदन्तरगतमेव सर्वं ब्रह्माण्डं सकलभुवनं योगी यथावद् द्रष्टुं समर्थो भवति। तत्र भुवनानां स्थिति: सर्वास्वेव टीकासु विस्तरेण वर्णिता। तस्मिन् वर्णने न कोऽपि विशेष: सर्वत्र समानमेव वर्णनम् उपलभ्यते। किन्तु नारायणतीर्थकृतयोगसिद्धान्तचन्द्रिका इति टीकाग्रन्थेषु भाष्याभिप्रायस्य स्फुटीकरणं कृत्वा विशेषेण यत् कृतं तदधिकं समीचीनं स्पष्टं च प्रतिभाति।

स्वामीनारायणभाष्ये वाक् वचोभि: वर्णनं भिन्नं प्राप्यते। एतदनुसारं महाब्रह्माण्डान्तर्गते अनेके ब्रह्माण्डास्सन्ति। महाब्रह्माण्डस्यावयवभूत एक ब्रह्माण्ड: चतुर्दशभुवनानां समष्टि:। भूलोकं केन्द्रं मत्वा अस्योपरि षट्लोका: तद्यथा - भुवर्लोक:, स्वर्लोक:, महर्लोक: जनर्लोक:, तपोलोक: सत्यलोकश्च इमे षट्लोका: ऊर्ध्वलोका: कथयन्ति। भूलोकस्याधस्तात् सप्तलोका: क्रमश: इमे

सन्ति अतललोक:, वितललोक: सुतललोक:, तलातललोक:, महातललोक:, रसातललोक:, पाताललोकश्च। एते ब्रह्माण्डस्ये कस्य अवयवा:। इत्थं महाब्रह्माण्डे

अनेके ब्रह्माण्डास्सन्ति। भूलोके पुनः सप्तद्वीपास्सन्ति। ते सन्ति – जम्बूप्लक्ष – शाल्मलि – कुश – क्रौच – शाक – पुष्कराश्चेति। प्रतिकद्वीपः समुद्रकेन आवेष्टितो भवति। द्वीपः समुद्रश्च उभौ वलयाकारितौ।

भूलोकस्योपरि भुवर्लोकः। अस्यापरं नाम अन्तरिक्षलोकोऽपि वर्तते। अस्मिन् ग्रहाः नक्षत्राणि, तारागणाः ज्योतिश्चक्रे निबद्धाः गतिमानास्सन्ति। अस्योपरि स्वर्लोकः। अस्य महेन्द्रलोक इति अपरं नाम। अस्मिन् षट् प्रकाराः देवजातयः। ये अणिमादि अष्टविधैश्वर्यसम्पन्नाः, सिद्धसंकल्पाः कल्पजीविनश्च सन्ति।

ततः परं महर्लोकः यं प्राजापत्यलोक इत्यपि कथयन्ति। अत्रापि विभिन्नजातीयाः देवाः निवसन्ति। महर्लोकात् परः जनलोकः अत्रापि अनेकदेव जातयस्सन्ति। तासु सर्वाधिक आयुष्मन्तः अमरसंज्ञकाः देवाः षट्दशसहस्रकल्पायुषः भवति। ततः परः तपोलोकः तत्र अहंकारवशिनः – अभास्वराः, महाभास्वराः, सत्यामहाभास्वराः इति त्रिविधो देवनिकायः। एते जनलोक देवापेक्षया द्विगुणद्विगुणोत्तरायुषः, ऊध्वरेतसः, ध्यानाहाराः सन्ति। तपोलोकात् परः सत्यलोकः। अयं च योगिनां निवासभूमिः: अत्र चत्वारः देवनिकायाः, अच्युतशुद्धनिवास-सत्याम्-संज्ञासंज्ञी योगिनस्सन्ति। ते क्रमशः सवितर्क-सविचार-सानन्द-सास्मितसमाधिसिद्धः। भूलोकस्याधस्तात् अतलादि-सप्तलोकाः। सप्तपाताललोकानामुपरि जलावरणः इति संक्षेपेण भुवनविवरणम्।

"सूर्ये संयमात्" इत्यस्य भाष्यकारमतेन विषयः सूर्यद्वारमस्ति एतद्योगिनां साक्षात् कर्त्तव्यम्। वाचस्पति मिश्रानुसारेण सुषुम्नानाडी संयमस्य विषयोऽस्ति। सूर्यद्वारे सुषुम्ना

नाडयां इति। भोजदेव: स्व विरचित भोजवृतौ सूर्ये प्रकाशमाने य: संयम: करोति इत्युक्त्वा स्वमतं प्रकटितवान्। विज्ञानभिक्षुरपि सूर्यशब्दस्य अर्थ: प्रकाशमान: सूर्य: इति गृहणाति।

भास्वतीकार: सूत्रस्थ सूर्ये इति शब्दस्य अर्थ: सुषुम्नाद्वारं मन्यते। स्वामीनारायणभाष्येऽपि प्रत्यक्ष -देव: भगवान् सूर्य: प्रकाशमान: गृह्यते।

भुवनानां वर्णनं न केवलं योगदर्शने अपितु प्रायश: सर्वेषु पुराणेषु (भागवते-विष्णुपुराणे) ज्योतिषशास्त्रे समुपलभ्यते। योगिनां सर्वेषामपि भुवनानां ज्ञानं प्रज्ञालोकेन जायते। यदा योगिन: समाधौ प्रविशन्ति तदा सिद्धत्वात् सूक्ष्मशरीरेण सर्वेषु लोकेषु गन्तुं शक्नुवन्ति, तथा च लोकानां दर्शनं ज्ञानञ्च तेषु एकस्मिन् स्थानेस्थितेष्वपि भवितुमर्हति। न केवलं एतदेव परम योगसिद्धा: गुरव: स्वशिष्यानपि लोकान् दर्शयितुम् समर्था:। येन शिष्येषु योगमार्ग प्रति दृढा श्रद्धा भवेत्। अस्य केवलम् एतदेवोद्देश्यं यत् स्वर्गादिलोक दर्शनेन दृष्वानुश्रविक उभयविषयेषु साधक: विरक्तो वितृष्णो वा भवेत्। शाण्डिल्योपनिषदि शरीरस्य अङ्गेषु विभिन्नष्वेङ्गेषु चित्तसंयमाद् विभिन्नानां लोकानां ज्ञानं भवतीति प्रतिपादितम्। एवं चतुर्दश भुवनानां ज्ञानं शरीरस्थ विभिन्नाङ्गेषु चित्तसंयमात् जायते इति निरूपितं तद्यथा - नासाग्रेचित्तसंयमादिन्द्रलोकज्ञानम्। तदधाश्चित्तसंयमाद् अग्निलोकज्ञानम्। चक्षुषि चित्तसंयमाद् सर्वलोकज्ञानम्। श्रोते चित्तसंयमाद्य लोकज्ञानम्। तत्पार्श्वेसंयमाद निऋतिलोकज्ञानम्। पृष्ठभागे संयमाद्वरूण लोकज्ञानम्।। वामकर्णे

संयमादद्वायुलोकज्ञानम्। कण्ठे संयमात् सोमलोक ज्ञानम्। वामचक्षुषि संयमाच्छिवलोकज्ञानम्। मूर्ध्नि संयमाद्ब्रह्मलोकज्ञानम्। पादाधो भागे संयमादतललोकज्ञानम्। पादेसंयमाद्वितललोकज्ञानम्। पादसंधो संयमाद् नितललोक ज्ञानम्। जङ्घे संयमाद् सुतललोकज्ञानम्। जानौ संयमाद् महातललोकज्ञानम्। उरौ चित्तसंयमाद्लोकज्ञानम्। कटौचित्तसंयमाद् तलातललोकज्ञानम्। नाभौ चित्तसंयमाद्लोकज्ञानम्। कुक्षौ संयमाद्भुवर्लोकज्ञानम्। हृदि चित्तसंयमात् महर्लोकज्ञानम्। कण्ठेचित्तसंयमाज्जनोलोक ज्ञानम्। भ्रूमध्ये चित्तसंयमात्तपोलोकज्ञानम्। मूर्ध्नि चित्तसंयमात् सत्यलोकज्ञानमिति प्रतिपाद्यते।

स्वामि योगानन्देव "योगी कथामुतम्" इत्यस्मिन् स्वपुस्तके स्वगुरोः श्री युक्तेश्वरगिरि महाभागस्य पुनरूत्थानस्य वर्णनं कृतं वर्तते। गुरूदेवः देहत्यागस्य षण्मासानन्तरं योगानन्दं दर्शनं दत्तवान्। तदा तेन विस्तरेण हिरण्यलोकाख्यस्य सूक्ष्मलोकस्य वर्णनं कृतम्। तदनुसारं सूक्ष्मशरीरमधिकांशत अंतिम भौतिकशरीरवत् अस्य यथार्थ प्रतिमूर्तीव भवति। सूक्ष्मजीवानां मुखं शरीर च तेषां पूर्वजन्मनां यौवनकालिकपार्थिव शरीरमिव भवति। कदाचित् कश्चन जीवः (मत्सदृशम्) स्ववृद्धावस्थायाः रूपमेव धारयन् तिष्ठति। सूक्ष्मजीवानां चक्षुरादिसमस्तेन्द्रियाणि भवन्ति किन्तु अन्तर्ज्ञानेन ते शरीरस्य केनचिद्पि अङ्गेन संवेदनानुभवः कर्तु सक्षमाः भवन्ति ते श्रोत्रेण, नासिकया, त्वचा, द्रष्टुम् शक्नुवन्ति अक्षणा, जिह्वा वा श्रोतुं शक्नुवन्ति तथा च त्वचा श्रोत्रेण वा रसास्वादने सक्षमाः भवन्ति।

**आवरणज्ञानस्वर्गलोकज्ञानादीनां कारणसमीक्षणम् -**

स्वामीनारायणभाष्ये आवरणज्ञानस्य विषये प्रतिपादितमस्ति-

**आवरणज्ञानं तत्र तत्र संयमात्।**[342]

अस्य सूत्रस्य भाष्यं पातञ्जलयोगसूत्रस्य ग्रन्थेषु यथा व्यासभाष्ये, तत्त्ववैशारद्यां भोजवृत्तेश्च नैव प्राप्यते। अस्मिन् सूत्रे दशगुणाः वर्णिताः। पञ्चभूतात्मकं सृष्टेः वर्णनं विद्यते। प्रथमं पृथिव्याः आवरणं निगद्यते। तत्र पृथिव्या आवरणं पञ्चाऽबुर्द्धपरिमितब्रह्माण्डस्योपरि ततो दशगुणं पञ्चवृन्दयोजनायामो विद्यते, तत्र शब्द-स्पर्श-रूप-रस-गंध गुणयुक्तो पृथिव्याः आवरणं भवति, अनन्तरं द्वितीयतत्त्वं जलावरणमस्ति। तत् जलतत्त्वं दशगुणाधिकं वर्त्तते। तदुपरि तेजतत्त्वस्यावरणं वर्त्तते। तस्य परमितः जलतो दशगुणमधिकं वर्त्तते। तदुपरि चतुर्थतमं तत्त्वं वायुरस्ति। तदुपरि पञ्चमं तत्त्वं महदाकाशवर्णनं वर्त्तते। तच्च वायुः दशगुणं पञ्चयोजनायां संस्थितम्। अनेन क्रमेण पृथिव्यादिपञ्चतत्त्वेषु संयमात् ब्रह्माण्डस्य ज्ञानं भवति।

अग्रिमसूत्रे **''ईश्वरलोकज्ञानं तत्र तत्र संयमात्''**[343] प्रकृतिः अष्टावरणात्मिका स्वीक्रियते। प्रकृतिं माया, मायिकमनित्यं च प्रतिपाद्यते। इयं प्रकृतेः ईश्वरादेव निश्रिताः। लिखितमस्ति विष्णुर्माया भगवति यया सम्मोहितं जगत इति विष्णुपुराणं वाक्येन स्पष्टयति माया विष्णुरंशभूता वर्त्तते। सांख्यशास्त्रेऽपि प्रकृतिं अनित्यत्वं

---

[342] योगदर्शनस्वामिनारायणभाष्यम् पृ. 281

[343] योगदर्शनस्वामिनारायणभाष्यम् पृ. 281

भजते। अत्र पञ्चभूतात्मकं शरीरमेवाऽऽत्मानमभिमन्यमाना: वर्त्तन्ते ते नास्तिका:। अग्रेऽपि ये पञ्चतन्मात्राण्यात्मत्वेनाऽभिमन्यमाना: अधमनास्तिका:। अग्रे च पञ्चवायूनात्मत्वेनाऽभिमन्यमाना: सन्ति ते महानास्तिका:। अथच पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाण्यात्मत्वेनाऽभिमन्यमाना: ते घोरनास्तिका:। ये च मन एवात्मतिमन्तारो विहन् नास्तिका:। तथा अहंकारमेवात्मानं मन्यमाना: स्वप्ननास्तिका:। ये बुद्धिं क्षणिकविज्ञानाद्यात्मिकामेवाऽऽत्मानमभिमन्यमाना: बौद्धनास्तिका:। ये वैभाषिकासौत्रान्तिकयोगाचारमाध्यमिका: तथाऽन्येऽप्यर्धनास्तिका: - ते ते सर्वे तत्र तत्रैव प्रकृतिलयात्मिकां सान्तां मुक्तिं लभन्ते। सैषा मायालोके प्रकृतिलयात्मिका मुक्त्याभासरूपा लभते।

अग्रिं सूत्रे **"आलोकाकाशज्ञानं विराट्संयमात्"**[344] अस्मिन् सूत्रे विराट्संयमेन आलोकाकाशज्ञानं भवति। अत्र विराट् पुरुषस्य लोक: वर्ण्यते। तत्र मूर्तिमत् विराट्पुरुषस्य वर्णनं वेदमन्त्रे क्रियते---'ततो विराडजायत' इति। यथा लोकेऽस्मिन् सूक्ष्मकारण महाकारणरूपेण च शरीरं चतुष्ट्यम् विद्यते तथैव महाविष्णोरपि चत्वारि शरीराणि विद्यन्ते। तत्रत्यदेवस्य विराट् नारायण-स्वर्णवर्णपुरुष-हिरण्यपुरुष-वैराजनारायण-ब्रह्मभूत्यनन्तभगवदलक्ष्यपुरुषाऽनामयपुषरुषस्वरूप-वेदनारायणाऽर्हन्देवे-त्यादीन्यभिधानानि सन्ति।

---

[344] योगदर्शनस्वामिनारायणभाष्यम् पृ. 282

अग्रेऽपि **"कैलासज्ञानं शिवलिङ्गज्योतिः संयमात्।"**[345] अस्मिन् सूत्रे शिवलिङ्गज्योतिः संयमात् कैलासज्ञानं भवति। विराट्लोकमावेष्ट्य मुक्तिस्थानं कैलासाभिधानं व्यवस्थितमस्ति, तत्र दिव्यं शिवलिङ्गाकारं ज्योतिरस्ति। तत्र च दिव्या गायत्रीदेवी चत्वारो वेदाश्च वन्दनां कुर्वन्ति। तत्रैव पञ्चमुखेस्त्री दिव्यरूपा नवलकिशोरी स्वयं शान्ता सत्त्वगुणस्वभावप्रकाशस्वरूपा तमोमयं तच्छिवलिङ्गं बिभ्रती संस्थिताऽस्तीति, सा पञ्चमुखी स्त्री कालपुरुषचैत्युभौ जडचेतनग्रन्थिरिति ख्यायते।

अग्रिम् सूत्रे **"सत्त्वस्वभावाकाशज्ञानं विष्णुसंयमात्"**[346] अस्मिन् सूत्रे विष्णुसंयमात् सत्त्वस्वभावाकाशज्ञानं भवति। 'सत्त्वस्वभावाकाशो नाम विष्णुलोकः' अत्र लोके विष्णुर्दिव्यं किशोरस्वरूपं लक्ष्मीयुक्तं भाति, अस्मिन् विष्णुलोके सप्तसरोवराणि चैतन्यमयानि सन्ति। तदिदं सप्तचैतन्यपरिबृहितं विष्णुलोकप्रस्थाममिति बोध्यम्, तत्र तत्र संयमात् तत्तज्ज्ञानं भवति।

श्रीकृष्णवल्लभाचार्यः अग्रे स्वरचितसूत्रे कथयन्ति **"अवतारधामज्ञानं महाविष्णुसंयमात्"**[347] अस्मिन् सूत्रे कथयन्ति महाविष्णुसंयमात् अवतारधामज्ञानं भवति। महाविष्णुः चतुर्थमहाकारणशरीरात्मकः ते स्वयं मूर्तिमान् महालक्ष्मीसेवितो विराजते। इयं लक्ष्मी महाकारणमाया इति ख्यायते। महाविष्णु अनया महालक्ष्म्या सह

---

[345] योगदर्शनस्वामिनारायणभाष्यम् पृ. 282-283

[346] योगदर्शनस्वामिनारायणभाष्यम् पृ. 284

[347] योगदर्शनस्वामिनारायणभाष्यम् पृ. 285

संसारे अवताररूपै: प्राविर्भवति सोऽयं विष्णु: षोडशकलाभि: पूर्ण इति। महाविष्णु: स्वयं आदिपुरुष: आदिनारायण: अनेकदिव्यशक्तिसहितो विराजते। तेषां प्रथमम् अभिधानम् 'आदिगोलोक:' इति। द्वितीयमभिधानं सीतारामस्वरूपं हनुमत्कपीश्वरादिसंसेवितं विद्यते। तृतीये द्वीपस्याऽभिधानं श्वेतद्वीपधाम इति वर्त्तते। चतुर्थद्वीपे बदरीकाश्रमधामेति वर्त्तते। पञ्चमे द्वीपे कपिलरूपे वर्त्तते। षष्ठद्वीपे पृथुराजरूपो महाविष्णु: पृथुराजधाम नाम्नाऽभिधीयते। सप्तमे दत्तात्रेयरूपं, अष्ट्मे ऋषभदेवरूपम्, नवद्वीपे वामनभगवत्स्वरूपो, दशमे द्वीपे परशुरामरूपम्, एकादशे द्वीपे सनत्कुमाररूपम्, द्वादशे द्वीपे वेदव्यासभगवत्रूपम्, त्रयोदशे द्वीपे बुद्धभगवत्रूपम्, चतुर्दशे द्वीपे कल्किभगवद्रूपम्, पञ्चदशे द्वीपे मोहिनीरूपम्, षोडशे द्वीपे यज्ञमूर्तिरूपम्, सप्तदशे द्वीपे धन्वन्तरिभगवत्स्वरूपम्, अष्टादशे द्वीपे नरसिंहरूपम्, एकोनविंशे द्वीपे हयग्रीवभगवद् रूपम्, विंशतितमे द्वीपे हंसावताररूपम्, एकविंशतितमे द्वीपे मत्स्यावताररूपम्, द्वाविंशतितमे द्वीपे कूर्मावताररूपम्, त्रयोविंशतितमे द्वीपे वराहावताररूपम्, चतुर्विंशतितमे द्वीपे नारदावताररूपम्, पञ्चविंशतितमे निराकाररूपम्। इत्थं भगवत: विष्णोरवतारधामसहितं विस्तरेण वर्णितम्।

अनन्तरं धारणाध्यानसमाधिसंयमात् हिरण्यमयकोशस्य ज्ञानं भवति।[348] तस्य हिरण्यमयकोशस्योपरि स्थितो ब्रह्मलाक: अनन्तरं भगवत: श्रीकृष्णसंयमात्

[348] योगदर्शनस्वामिनारायणभाष्यम् पृ. 287

नित्यलोकज्ञानं भवति तस्यापरं नाम निरञ्चनब्रह्मलोकम् अभिधीयते। अर्थात् ब्रह्मधामो विद्यते। तत्र राधिकायां सहितेन श्रीकृष्णो विराजते तत्रापि प्रथृक् - पृथक् स्थानानां वर्णनं विद्यते। अग्रे प्रतिपादयन्ति शबलब्रह्मणो ज्ञानं भवति। शबलब्रह्मपुरुषो भगवानऽस्ति अत्र विभिन्नानां शक्तीनां वर्णनं प्राप्यते।

अनन्तरं केवलब्रह्मलोकस्य ज्ञानं वर्त्तते।[349] केवलं ब्रह्मलोकः सबलब्रह्मतोदशागुणमधिकं पञ्चाशत्सहस्रपरार्धयोजनविस्तारं भवति। तत्र च केवलं ब्रह्मपुरुषो भगवानऽस्ति। तत्र नवब्रह्मसुदर्शनचक्राणि मूर्तिमन्ति संस्थितानि सन्ति तत्र गत्वा जीवस्य गमनागमने प्रतिबन्धिकेति।

अनन्तरं तद् ब्रह्मसंयमात् अक्षरब्रह्मज्ञानं भवति।[350] तत्र सच्चिदानन्दधामनि ब्रह्मप्रासादो विद्यते, तत्र दिव्या अष्ट्सिद्धयो मूर्त्तिमत्योनिवसन्ति, तत्रमूलाक्षरं ब्रह्म गुणातीतानन्दात्मकं मूत्तिमत् संराजते, तत्र मणिमयाः शैलाः सन्ति। तत्र अनन्तकोटियुक्तानि मण्डलानि गुणातीतानन्दाक्षरब्रह्मणः सेवादिकं विदधति, पुनः अग्रे आचार्यः प्रतिपादयन्ति धारणाध्यानसमाधिसंयमादेव निराकाराऽक्षरब्रह्माश्रयं भवति।

महाकारणात्मकक्षरं ब्रह्मनिराकाररूपेण तेजोमयं अक्षरपरमं धाममिति उच्यते। स परमात्मा अनन्तकोटि महामुक्तानां मण्डलेरावेष्टितः संसेवितोऽस्ति, तत्र गत्वा मुक्तानां परमेश्वरादि भावना भवति। तस्याऽक्षरातीत पुरुषोतमस्य परब्रह्मणः उपासकानां परं

---

349 योगदर्शनस्वामिनारायणभाष्यम् पृ. 290

350 योगदर्शनस्वामिनारायणभाष्यम् पृ. 291

मोक्षो स्थानम्। इत्थं सर्वेषां परमेश्वरस्य स्वामिनो नारायणस्य स्वरूपे धारणा-ध्यानं समाधिश्च विन्दतो योगिनः परमेश्वरस्वरूपं भवतीति।

इत्थम् आचार्येण द्वादशसूत्रे भगवतः नारायणस्य विभिन्नानि स्वरूपाणि, स्थानानानि लोकाः, शक्तीनाञ्च वैभवं प्रतिपादितम्। अन्येषु यौगिकग्रन्थेषु एतादृशं प्रतिपादनं नैव प्राप्यते।